श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीसूक्तम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीसूक्तम् ॥

There could be more variations than those mentioned here.

हिर॑ण्यवर्णां॒ हरि॑णीं सु॒वर्णर॑ज॒तस्र॑जाम्।
[हिर॑ण्यवर्णां॒ हरि॑णीं सु॒वर्ण॑रज॒तस्र॑जाम्।]
[हिर॑ण्यवर्णां॒ हरि॑णीं सु॒वर्णर॑जत॒स्रजाम्।]
च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं॒ जात॑वेदो म॒ आव॑ह॥ **1**॥
[च॒न्द्रां॒ हि॒रण्म॑यीं ल॒क्ष्मीं॒ जात॑वेदो म॒माव॑ह॥ **1**॥]
[च॒न्द्रां॒ हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह॥ **1**॥]

तां म॒ आव॑ह॒ जात॑वेदो ल॒क्ष्मीमन॑पगा॒मिनी᳚म्।
यस्यां॒ हिर॑ण्यं वि॒न्देयं॒ गामश्वं॒ पुरु॑षान॒हम्॥ **2**॥

अ॒श्व॒पू॒र्वां र॑थम॒ध्यां॒ ह॒स्तिना॑द प्र॒बोधि॑नीम्।
श्रियं॑ दे॒वीमुप॑ह्वये॒ श्रीर्मा॑ दे॒वीर्जु॑षताम्॥ **3**॥

कां॒ सो॒स्मि॒तां हिर॑ण्यप्राकारामा॒र्द्रां ज्वल॑न्तीं तृ॒प्तां त॒र्पय॑न्तीम्।
प॒द्मे॒ स्थि॒तां प॒द्मव॑र्णां॒ त्वामि॒होप॑ह्वये॒ श्रियम्॥ **4**॥

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मनेमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे॥ 5॥
[तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे॥ 5॥]

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः॥ 6॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥ 7॥
[प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥ 7॥]
[प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥ 7॥]

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीर्नाशयाम्यहम्।
[क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीर्नाशयाम्यहम्।]
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्॥ 8॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
[गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।]
ईश्वरीगं सर्वभूतानां तामिहोपह्वये श्रियम्॥ 9॥
[ईश्वरीगं सर्वभूतानां तामिहोपह्वये श्रियम्॥ 9॥]

मनसः काममाकूतिं वाचस्सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्रीश्श्रयतां यशः॥ 10॥

कर्दमेन प्रजाभूता मयि संभव कर्दम।
[कर्दमेन प्रजाभूता मयि संभव कर्दम।]
श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥ **11**॥
[श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥ **11**॥]

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।
[आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।]
नि च देवीं मातरं श्रियं वासय मे कुले॥ **12**॥

आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥ **13**॥

आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥ **14**॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम्॥ **15**॥
[यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम्॥ **15**॥]

पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदळायताक्षि।
विश्वप्रिये विष्णुमनोऽनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व॥ **16**॥

श्रियै जातश्रिय आनिर्याय श्रियं वयो जनितृभ्यो ददातु।
श्रियं वसाना अमृतत्वमायन् भवन्ति सद्यस्समिधा मितध्यून्॥ **17**॥
[श्रियं वसाना अमृतत्वमायन् भवन्ति सद्यस्सविता विदध्यून्॥ **17**॥]

श्रियं एवैनं तच्छ्रियामांदधाति।
सन्ततमृचा वषट्कृत्यं सन्धत्तं सन्धीयते प्रजंया पशुभिंः।
य एंवं वेद॥ **18**॥

ओं महादेव्यै चं विद्महें विष्णुपत्न्यै चं धीमहि।
तन्नों लक्ष्मीः प्रचोदयांत्॥ **19**॥

**॥ इति श्रीसूक्तं समाप्तम्॥**